श्री वेङ्कटेश्वरं देवं वरदं विश्वरूपिणम् ।

वेदवेद्यं विश्ववन्द्यं वरदक्षेत्र वासिनम् ॥

# SRI VENKATESHWARA CULTURAL CENTER

## DIVYA STOTHRANI




SRI VARADA VENKATESHWARA TEMPLE
8221 Chestnut Street, Barto, PA 19504

# ॥ श्री गणेश पञ्चरत्नम् ॥

अगजानन पद्मार्कं गजाननमहर्निशम् ।

अनेकदन्तं भक्तानां एकदन्तमुपास्महे ॥

गजाननं भूतगणाधिसेवितं कपित्थजम्बूफलसार भक्षितम् ।

उमासुतं शोकविनाशकारणं नमामि विघ्नेश्वर पादपङ्कजम् ॥

१ मुदाकरात्त मोदकं सदा विमुक्ति साधकं कलाधरावतंसकं विलासिलोक रक्षकम् ।

अनायकैक नायकं विनाशितेभ दैत्यकं नताशुभाशु नाशकं नमामि तं विनायकम् ॥

२ नतेतराति भीकरं नवोदितार्क भास्वरं नमत्सुरारि निर्जरं नताधिकापदुद्धरम् ।

सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं महेश्वरं तमाश्रये परात्परं निरन्तरम् ॥

३ समस्त लोक शङ्करं निरस्त दैत्य कुञ्जरं दरेतरोदरं वरं वरेभवक्त्रमक्षरम् ।

कृपाकरं क्षमाकरं मुदाकरं यशस्करं मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥

४ अकिञ्चनार्तिमार्जनं चिरन्तनोक्ति भाजनं पुरारिपूर्व नन्दनं सुरारि गर्वचर्वणं ।

प्रपञ्च नाशभीषणं धनञ्जयादि भूषणं कपोलदान वारणं भजे पुराण वारणम् ॥

५ नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजं अचिन्त्यरूपमन्तहीनमन्तराय कृन्तनम् ।

हृदन्तरे निरन्तरं वसन्तमेव योगिनां तमेकदन्तमेव तं विचिन्तयामि सन्ततम् ॥

६ महागणेश पञ्चरत्नमादरेण योऽन्वहं प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरं ।

अरोगतामदोषतां सुसाहितीं सुपुत्रतां समाहितायु रष्टभूतिमभ्युपैति सोऽचिरात् ॥

इति श्री गणेश पञ्चरत्नम्

# ॥ श्री वेङ्कटेश सुप्रभातम् ॥

१. कौसल्या सुप्रजा राम पूर्वासन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥

२. उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज ।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु ॥

३. मातस्समस्त जगतां मधुकैटभारेः वक्षोविहारिणि मनोहर दिव्यमूर्ते ।
श्रीस्वामिनि श्रितजनप्रिय दानशीले श्री वेङ्कटेश दयिते तव सुप्रभातम् ॥

४. तव सुप्रभातमरविन्द लोचने भवतु प्रसन्नमुख चन्द्रमण्डले ।
विधि शङ्करेन्द्र वनिताभिरर्चिते वृष शैलनाथ दयिते दयानिधे ॥

५. अत्र्यादि सप्त ऋषयस्समुपास्य सन्ध्यां आकाश सिन्धु कमलानि मनोहराणि ।
आदाय पादयुग मर्चयितुं प्रपन्नाः शेषाद्रि शेखर विभो तव सुप्रभातम् ॥

६. पञ्चाननाब्ज भव षण्मुख वासवाद्याः त्रैविक्रमादि चरितं विबुधाः स्तुवन्ति ।
भाषापतिः पठति वासर शुद्धि मारात् शेषाद्रि शेखर विभो तव सुप्रभातम् ॥

७. ईशत्–प्रफुल्ल सरसीरुह नारिकेल पूगद्रुमादि सुमनोहर पालिकानाम् ।
आवाति मन्दमनिलः सहदिव्य गन्धैः शेषाद्रि शेखर विभो तव सुप्रभातम् ॥

८. उन्मील्यनेत्र युगमुत्तम पञ्जरस्थाः पात्रावशिष्ट कदली फल पायसानि ।
भुक्त्वा सलीलमथकेलि शुकाः पठन्ति शेषाद्रि शेखर विभो तव सुप्रभातम् ॥

९. तन्त्री प्रकर्ष मधुर स्वनया विपञ्च्या गायत्यनन्त चरितं तव नारदोऽपि ।
भाषा समग्र मसकृत् करचाररम्यं शेषाद्रि शेखर विभो तव सुप्रभातम् ॥

१०. भृङ्गावली च मकरन्द रसानु विद्ध झुङ्कारगीत निनदैः सहसेवनाय ।
निर्यात्युपान्त सरसी कमलोदरेभ्यः शेषाद्रि शेखर विभो तव सुप्रभातम् ॥

११. योषागणेन वरदध्नि विमथ्यमाने घोषालयेषु दधिमन्थन तीव्रघोषाः ।
रोषात्कलिं विदधते ककुभश्च कुम्भाः शेषाद्रि शेखर विभो तव सुप्रभातम् ।

१२. पद्मेशमित्र शतपत्र गतालिवर्गाः हर्तुं श्रियं कुवलयस्य निजाङ्गलक्ष्म्या ।
भेरी निनादमिव भिभ्रति तीव्रनादम् शेषाद्रि शेखर विभो तव सुप्रभातम् ॥

१३. श्रीमन्नभीष्ट वरदाखिल लोक बन्धो श्री श्रीनिवास जगदेक दयैक सिन्धो ।
श्री देवता गृह भुजान्तर दिव्यमूर्ते श्री वेङ्कटाचलपते तव सुप्रभातम् ॥

१४. श्री स्वामि पुष्करिणिकाप्लव निर्मलाङ्गाः श्रेयोऽर्थिनो हरविरिञ्च सनन्दनाद्याः ।
द्वारे वसन्ति वरवेत्र हतोत्त माङ्गाः श्री वेङ्कटाचलपते तव सुप्रभातम् ॥

१५. श्री शेषशैल गरुडाचल वेङ्कटाद्रि नारायणाद्रि वृषभाद्रि वृषाद्रि मुख्याम् ।
आख्यां त्वदीय वसते रनिशं वदन्ति श्री वेङ्कटाचलपते तव सुप्रभातम् ॥

१६. सेवापराः शिव सुरेश कृशानुधर्म रक्षोम्बुनाथ पवमान धनाधिनाथाः ।
बद्धाञ्जलि प्रविलसन्निज शीर्षदेशाः श्री वेङ्कटाचलपते तव सुप्रभातम् ॥

१७. धाटीषु ते विहगराज मृगाधिराज नागाधिराज गजराज हयाधिराजाः ।
स्वस्वाधिकार महिमाधिक मर्थयन्ते श्री वेङ्कटाचलपते तव सुप्रभातम् ॥

१८. सूर्येन्दु भौम बुधवाक्पति काव्यशौरि स्वर्भानुकेतु दिविशत्–परिषत्–प्रधानाः ।
त्वद्दासदास चरमावधि दासदासाः श्री वेङ्कटाचलपते तव सुप्रभातम् ॥

१९.　त्वत्–पादधूलि भरित स्फुरितोत्तमाङ्गाः स्वर्गापवर्ग निरपेक्ष निजान्तरङ्गाः ।
कल्पागमा कलनयाऽऽकुलतां लभन्ते श्री वेङ्कटाचलपते तव सुप्रभातम् ॥

२०.　त्वद्गोपुराग्र शिखराणि निरीक्षमाणाः स्वर्गापवर्ग पदवीं परमां श्रयन्तः ।
मर्त्या मनुष्य भुवने मतिमाश्रयन्ते श्री वेङ्कटाचलपते तव सुप्रभातम् ॥

२१.　श्री भूमिनायक दयादि गुणामृताब्दे देवादिदेव जगदेक शरण्यमूर्ते ।
श्रीमन्ननन्त गरुडादिभि रर्चिताङ्घ्रे श्री वेङ्कटाचलपते तव सुप्रभातम् ॥

२२.　श्री पद्मनाभ पुरुषोत्तम वासुदेव वैकुण्ठ माधव जनार्दन चक्रपाणे ।
श्री वत्स चिह्न शरणागत पारिजात श्री वेङ्कटाचलपते तव सुप्रभातम् ॥

२३.　कन्दर्प दर्प हर सुन्दर दिव्यमूर्ते कान्ता कुचाम्बुरुह कुण्मल लोलदृष्टे ।
कल्याण निर्मल गुणाकर दिव्यकीर्ते श्री वेङ्कटाचलपते तव सुप्रभातम् ॥

२४.　मीनाकृते कमठकोल नृसिंह वर्णिन् स्वामिन् परश्वथ तपोधन रामचन्द्र ।
शेषांशराम यदुनन्दन कल्किरूप श्री वेङ्कटाचलपते तव सुप्रभातम् ॥

२५.　एलालवङ्ग घनसार सुगन्धि तीर्थं दिव्यं वियत्सरिति हेमघटेषु पूर्णम् ।
धृत्वाद्य वैदिक शिखामणयः प्रहृष्टाः तिष्ठन्ति वेङ्कटपते तव सुप्रभातम् ॥

२६.　भास्वानुदेति विकचानि सरोरुहाणि सम्पूरयन्ति निनदैः ककुभो विहङ्गाः ।
श्रीवैष्णवाः सतत मर्थित मङ्गलास्ते धामाश्रयन्ति तव वेङ्कट सुप्रभातम् ॥

२७.　ब्रह्मादयः सुरवराः समहर्षयस्ते सन्तःसनन्दन मुखास्त्वथ योगिवर्याः ।
धामान्तिके तव हि मङ्गल वस्तु हस्ताः श्री वेङ्कटाचलपते तव सुप्रभातम् ॥

२८. लक्ष्मीनिवास निरवद्य गुणैकसिन्धो संसारसागर समुत्तरणैक सेतो ।
वेदान्त वेद्य निजवैभव भक्तभोग्य श्री वेङ्कटाचलपते तव सुप्रभातम् ॥

२९. इत्थं वृषाचलपतेरिह सुप्रभातं ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः ।
तेषां प्रभात समये स्मृतिरङ्गभाजां प्रज्ञां परार्थ सुलभां परमां प्रसूते ॥

इति श्री वेङ्कटेश्वर सुप्रभातम्

## ॥ श्रीवेङ्कटेश स्तोत्रम् ॥

१. कमलाकुच चूचुक कुङ्कमतो नियतारुणि तातुल नीलतनो ।
कमलायत लोचन लोकपते विजयीभव वेङ्कट शैलपते ॥

२. सचतुर्मुख षण्मुख पञ्चमुख प्रमुखाऽखिलदैवत मौलिमणे ।
शरणागत वत्सल सारनिधे परिपालय मां वृष शैलपते ॥

३. अतिवेलतया तव दुर्विषहैरनु वेलकृतै रपराधशतैः ।
भरितं त्वरितं वृष शैलपते परया कृपया परिपाहि हरे ॥

४. अधि वेङ्कट शैल मुदारमते–र्जनताभि मताधिक दानरतात् ।
परदेवतया गदितानिगमैः कमलादयितान्न परङ्कलये ॥

५. कल वेणुर वावश गोपवधू शतकोटि वृतात्स्मर कोटि समात् ।
प्रति पल्लविकाभि मतात्–सुखदाद् वसुदेव सुतान्न परङ्कलये ॥

६. अभिराम गुणाकर दाशरथे जगदेक धनुर्धर धीरमते ।
रघुनायक राम रमेश विभो वरदो भव देव दया जलधे ॥

७. अवनी तनया कमनीय करं रजनीकर चारु मुखाम्बुरुहम् ।

रजनीचर राजतमोमिहिरं महनीयमहं रघुराममये ॥

८. सुमुखं सुहृदं सुलभं सुखदं स्वनुजं च सुकायम मोघशरम् ।

अपहाय रघूद्वय मन्यमहं न कथञ्चन कञ्चन जातु भजे ॥

९. विना वेङ्कटेशं न नाथो न नाथः सदा वेङ्कटेशं स्मरामि स्मरामि ।

हरे वेङ्कटेश प्रसीद प्रसीद प्रियं वेङ्कटेश प्रयच्छ प्रयच्छ ॥

१०. अहं दूरतस्ते पदाम्भोजयुग्म प्रणामेच्छयाऽऽगत्य सेवां करोमि ।

सकृत्सेवया नित्यसेवा फलं त्वं प्रयच्छ प्रयच्छ प्रभो वेङ्कटेश ॥

११. अज्ञानिना मया दोषा न शेषान्विहितान् हरे ।

क्षमस्व त्वं क्षमस्व त्वं शेषशैल शिखामणे ॥ इति श्रीवेङ्कटेश स्तोत्रम्

## ॥ श्री वेङ्कटेश प्रपत्तिः ॥

१. ईशानां जगतोऽस्य वेङ्कटपते–र्विष्णोः परां प्रेयसीम्

तद्वक्षस्थल नित्यवास रसिकां तत्–क्षान्ति संवर्धिनीम् ।

पद्मालङ्कृत पाणिपल्लवयुगां पद्मासनस्थां श्रियं

वात्सल्यादि गुणोज्ज्वलां भगवतीं वन्दे जगन्मातरम् ॥

२. श्रीमन् कृपाजलनिधे कृतसर्वलोक सर्वज्ञ शक्त नतवत्सल सर्वशेषिन् ।

स्वामिन् सुशील सुलभाश्रित पारिजात–श्रीवेङ्कटेशचरणौ शरणं प्रपद्ये ॥

३. आनूपुरार्चित सुजात सुगन्धि पुष्प–सौरभ्य सौरभकरौ समसन्निवेशौ ।
सौम्यौ सदानुभनेऽपि नवानुभाव्यौ श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

४. सद्योविकासि समुदित्त्वर सान्द्रराग सौरभ्यनिर्भर सरोरुह साम्यवार्ताम् ।
सम्यक्षु साहसपदेषु विलेखयन्तौ श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

५. रेखामय ध्वज सुधाकलशातपत्र वज्राङ्कुशाम्बुरुह कल्पक शङ्खचक्रैः ।
भव्यैरलङ्कृततलौ परतत्त्व चिह्नैः श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

६. ताम्रोदरद्युति पराजित पद्मरागौ बाह्यैर्–महोभि रभिभूत महेन्द्रनीलौ ।
उद्यन्नखांशुभि रुदस्त शशाङ्क भासौ श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

७. स प्रेमभीति कमलाकर पल्लवाभ्यां संवाहनेऽपि सपदि क्लम मादधानौ ।
कान्ताववाङ्मानस गोचर सौकुमार्यौ श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

८. लक्ष्मी मही तदनुरूप निजानुभाव–नीकादि दिव्य महिषी करपल्लवानाम् ।
आरुण्य सङ्क्रमणतः किल सान्द्ररागौ श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

९. नित्यानमद्विधि शिवादि किरीटकोटि प्रत्युप्त दीप्त नवरत्नमहः प्ररोहैः ।
नीराजनाविधि मुदार मुपादधानौ श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

१०. विष्णोः पदे परम इत्युदित प्रशंसौ यौ मध्व उत्स इति भोग्य तयाऽप्युपात्तौ ।
भूयस्तथेति तव पाणितल प्रदिष्टौ श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

११. पार्थाय तत्–सदृश सारथिना त्वयैव यौ दर्शितौ स्वचरणौ शरणं व्रजेति ।
भूयोऽपि मह्य मिह तौ करदर्शितौ ते श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

१२. मन्मूर्ध्नि कालियफने विकटाटवीषु श्रीवेङ्कटाद्रि शिखरे शिरसि श्रुतीनाम् ।
चित्तेऽप्यनन्य मनसां सममाहितौ ते श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

१३. अम्लान हृष्य दवनीतल कीर्णपुष्पौ श्रीवेङ्कटाद्रि शिखराभरणायमानौ ।
आनन्दिताखिल मनो नयनौ तवै तौ श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

१४. प्रायः प्रपन्न जनता प्रथमावगाह्यौ मातुः स्तनाविव शिशो रमृतायमाणौ ।
प्राप्तौ परस्पर तुला मतुलान्तरौ ते श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

१५. सत्त्वोत्तरैः सतत सेव्यपदाम्बुजेन संसार तारक दयार्द्र दृगञ्चलेन ।
सौम्योपयन्तृ मुनिना मम दर्शितौ ते श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

१६. श्रीश श्रिया घटिकया त्वदुपाय भावे प्राप्येत्वयि स्वयमुपेय तया स्फुरन्त्या ।
नित्याश्रिताय निरवद्य गुणाय तुभ्यं स्यां किङ्करो वृषगिरीश न जातु मह्यम् ॥

इति श्रीवेङ्कटेश प्रपत्तिः

## ॥ श्री वेङ्कटेश मङ्गलाशासनम् ॥

१. श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवेङ्कट निवासाय श्रीनिवासाय मङ्गलम् ॥

२. लक्ष्मी सविभ्रमालोक सुभ्रू विभ्रम चक्षुषे ।
चक्षुषे सर्वलोकानां वेङ्कटेशाय मङ्गलम् ॥

३ श्रीवेङ्कटाद्रि शृङ्गाग्र मङ्गलाभरणाङ्घ्रये ।
मङ्गलानां निवासाय श्रीनिवासाय मङ्गलम् ॥

४. सर्वावयव सौन्दर्य सम्पदा सर्वचेतसाम् ।

सदा सम्मोहनायास्तु वेङ्कटेशाय मङ्गलम् ॥

५. नित्याय निरवद्याय सत्यानन्द चिदात्मने ।

सर्वान्तरात्मने श्रीमद्–वेङ्कटेशाय मङ्गलम् ॥

६. स्वतः सर्वविदे सर्व–शक्तये सर्वशेषिणे ।

सुलभाय सुशीलाय वेङ्कटेशाय मङ्गलम् ॥

७. परस्मै ब्रह्मणे पूर्णकामाय परमात्मने ।

प्रयुञ्जे परतत्त्वाय वेङ्कटेशाय मङ्गलम् ॥

८. आकालतत्त्व मश्रान्त मात्मना मनुपश्यताम् ।

अतृप्त्यमृत रूपाय वेङ्कटेशाय मङ्गलम् ॥

९. प्रायः स्वचरणौ पुंसां शरण्यत्वेन पाणिना ।

कृपयाऽऽदिशते श्रीमद्–वेङ्कटेशाय मङ्गलम् ॥

१०. दयाऽमृत तरङ्गिण्या–स्तरङ्गैरिव शीतलैः ।

अपाङ्गैः सिञ्चते विश्वं वेङ्कटेशाय मङ्गलम् ॥

११. स्रग्भूषांबरहेतीनां सुषमावहमूर्तये ।

सर्वार्तिशमनायास्तु वेङ्कटेशाय मङ्गलम् ॥

१२. श्री वैकुंठविरक्ताय स्वामिपुष्करिणी तटे ।

रमया रममाणाय वेङ्कटेशाय मङ्गलम् ॥

१३. श्रीमत्सुंदर जामातृमुनिमानस वासिने ।

सर्वलोकनिवासाय श्रीनिवासाय मंगलम् ॥

१४. मंगळाशासनपरैर्मदाचार्य पुरोगमैः ।

सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मंगलम् ॥

१५. श्री वेङ्कटेश्वरं देवं वरदं विश्वरूपिणम् ।

वेदवेद्यं विश्ववन्द्यं वरदक्षेत्र वासिनम् ॥ इति श्री मङ्गलाशासनम्

## ॥ श्री कनकधारा स्तोत्रम् ॥

१. अङ्गं हरेः पुलकभूषणमाश्रयन्ती भृङ्गाङ्गनेव मुकुलाभरणं तमालम् ।

अङ्गीकृताखिलविभूतिरपाङ्गलीला माङ्गल्यदाऽस्तु मम मङ्गलदेवतायाः ॥

२. मुग्धा मुहुर्विदधती वदने मुरारेः प्रेमत्रपा प्रणिहितानि गतागतानि ।

मालादृशोर्मधुकरीव महोत्पले या सा मे श्रियं दिशतु सागरसम्भवायाः ॥

३. आमीलिताक्षमधिगम्य मुदा मुकुन्दं आनन्दकन्दमनिमेषमनङ्गतन्त्रम् ।

आकेकरस्थित कनीनिक पक्ष्मनेत्रं भूत्यै भवेन्मम भुजङ्ग शयाङ्गनायाः ॥

४. बाह्वन्तरे मधुजितः श्रितकौस्तुभे या हारावलीव हरिनीलमयी विभाति ।

कामप्रदा भगवतोऽपि कटाक्षमाला कल्याणमावहतु मे कमलालयाः ॥

५. कालाम्बुदालि ललितोरसि कैटभारेः धाराधरे स्फुरति या तडिदङ्गनेव ।

मातुस्समस्त जगतां महनीय मूर्तिः भद्राणि मे दिशतु भार्गव नन्दनायाः ॥

६.   प्राप्तं पदं प्रथमतः खलु यत्प्रभावात् मङ्गल्यभाजि मधुमाथिनि मन्मथेन ।

मय्यापतेत्तदिह मन्थरमीक्षणार्धं मन्दालसं च मकरालय कन्यकायाः ॥

७.   विश्वामरेन्द्र पदविभ्रमदानदक्षं आनन्दहेतुरधिकं मुरविद्विषोऽपि ।

ईषन्निषीदतु मयि क्षणमीक्षणार्धं इन्दीवरोदरसहोदरमिन्दिरायाः ॥

८.   इष्टाविशिष्टमतयोऽपि यया दयार्द्र दृष्ट्या त्रिविष्टपपदं सुलभं लभन्ते ।

दृष्टिः प्रहृष्टकमलोदरदीप्तिरिष्टां पुष्टिं कृषीष्ट मम पुस्करमिष्टरायाः ॥

९   दद्याद् दयानुपवनो द्रविणाम्बुधारां अस्मिन्नकिञ्चन विहङ्गशिशौ विषण्णे ।

दुष्कर्म घर्ममपनीय चिराय दूरं नारायणप्रणयिनी नयनाम्बुवाहः ॥

१०.   गीर्देवतेति गरुडध्वज सुन्दरीति शाकम्भरीति शशिशेखर–वल्लभेति ।

सृष्टिस्थितिप्रलय केलिषु संस्थितायै तस्यै नमस्त्रिभुवनैक गुरोस्तरुण्यै ॥

११.   श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै रत्यै नमोऽस्तु रमणीय गुणार्णवायै ।

शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै ॥

१२.   नमोऽस्तु नालीक निभाननायै नमोऽस्तु दुग्धोदधि जन्मभूम्यै ।

नमोऽस्तु सोमामृत सोदरायै नमोऽस्तु नारायणवल्लभायै ॥

१३.   नमोऽस्तु हेमाम्बुज पीठिकायै नमोऽस्तु भूमण्डल नायिकायै ।

नमोऽस्तु देवादिदयापरायै नमोऽस्तु शार्ङ्गायुध वल्लभायै ॥

१४.   नमोऽस्तु देव्यै भृगुनन्दनायै नमोऽस्तु विष्णोरुरसि स्थितायै ।

नमोस्तु लक्ष्म्यै कमलालयायै नमोऽस्तु दामोदर वल्लभायै ॥

१५. नमोऽस्तु कान्त्यै कमलेक्षणायै नमोऽस्तु भूत्यै भुवनप्रसूत्यै ।

नमोऽस्तु देवादिभिरर्चितायै नमोऽस्तु नन्दात्मजवल्लभायै ॥

१६. संपत्कराणि सकलेन्द्रिय नन्दनानि साम्राज्यदानविभवानि सरोरुहाक्षि ।

त्वद्वन्दनानि दुरिताहरणोद्यतानि मामेव मातरनिशं कलयन्तु मान्ये ॥

१७. यत्कटाक्ष समुपासनाविधिः सेवकस्य सकलार्थ संपदः ।

सन्तनोति वचनाङ्गमानसैः त्वां मुरारि हृदयेश्वरीं भजे ॥

१८. सरसिज निलये सरोज हस्ते धवलतरांशुक गन्धमाल्य शोभे ।

भगवति हरिवल्लभे मनोज्ञे त्रिभुवन भूतिकरि प्रसीद मह्यम् ॥

१९. दिग्घस्तिभिः कनककुंभमुखावसृष्ट स्वर्वाहिनी विमलचारुजलप्लुताङ्गीम् ।

प्रातर्नमामि जगतां जननीमशेष–लोकाधिनाथ गृहिणीममृताब्धि पुत्रीम्॥

२०. कमले कमलाक्ष वल्लभे त्वं करुणापूर तरङ्गितैरपाङ्गैः ।

अवलोकय मामकिञ्चनानाम् प्रथमं पात्रमकृत्रिमं दयायाः ॥

२१. स्तुवन्ति ये स्तुतिभिरमूभिरन्वहं त्रयीमयीं त्रिभुवन मातरं रमाम् ।

गुणाधिका गुरुतर भाग्य भागिनो भवन्ति ते भुवि बुध भाविताशयाः ॥

इति श्रीमच्छङ्कराचार्यविरचितं कनकधारास्तोत्रं सम्पूर्णम्

# ॥ श्री महिषासुरमर्दिनी स्तोत्रम् ॥

१. अयिगिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दनुते
गिरिवर विन्ध्यशिरोऽधि निवासिनि विष्णुविलासिनि जिष्णुनुते ।
भगवति हे शितिकण्ठ कुटुम्बिणि भूरिकुटुम्बिणि भूरिकृते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

२. सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते
त्रिभुवनपोषिणि शङ्करतोषिणि किल्बिषमोषिणि घोषरते ।
दनुजनिरोषिणि दितिसुतरोषिणि दुर्मदशोषिणि सिन्धुसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

३. अयि जगदम्ब मदम्ब कदम्ब वनप्रियवासिनि हासरते
शिखरि शिरोमणि तुङ्गहिमालय शृङ्गनिजालय मध्यगते ।
मधुमधुरे मधुकैटभगञ्जिनि कैटभभञ्जिनि रासरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

४. अयि शतखण्ड विखण्डितरुण्ड वितुण्डितशुण्डगजाधिपते
रिपुगजगण्ड विदारणचण्ड पराक्रमशुण्ड मृगाधिपते ।
निजभुजदण्ड निपातितखण्ड विपातितमुण्ड भटाधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

५. अयि रणदुर्मद शत्रुवधोदित दुर्धरनिर्जर शक्तिभृते
चतुरविचार धुरीणमहाशिव दूतकृत प्रमथाधिपते ।

दुरितदुरीह दुराशयदुर्मति दानवदूत कृतान्तमते

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

६. अयि शरणागत वैरिवधूवर वीरवराभय दायकरे

त्रिभुवनमस्तक शूलविरोधि शिरोऽधिकृतामल शूलकरे ।

दुमिदुमितामर दुन्दुभिनाद महोमुखरीकृत दिङ्मकरे

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

७. अयि निजहुङ्कृति मात्रनिराकृत धूम्रविलोचन धूम्रशते

समरविशोषित शोणितबीज समुद्भवशोणित बीजलते ।

शिवशिवशुम्भ निशुम्भमहाहव तर्पितभूत पिशाचरते

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

८. धनुरनुषङ्ग रणक्षणसङ्ग परिस्फुरदङ्ग नटत्कटके

कनकपिशङ्ग पृषत्कनिषङ्ग रसद्भटशृङ्ग हताबटुके ।

कृतचतुरङ्ग बलक्षितिरङ्ग घटद्बहुरङ्ग रटद्बटुके

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

९. सुरललना ततथेयि तथेयि कृताभिनयोदर नृत्यरते

कृत कुकुथः कुकुथो गडदादिकताल कुतूहल गानरते ।

धुधुकुट धुक्कुट धिंधिमित ध्वनि धीर मृदंग निनादरते

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

१०. जय जय जप्य जयेजयशब्द परस्तुति तत्परविश्वनुते

झणझणझिञ्झिमि झिङ्कृत नूपुरशिञ्जितमोहित भूतपते ।

नटित नटार्ध नटी नट नायक नाटितनाट्य सुगानरते

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

११. अयि सुमनःसुमनःसुमनः सुमनःसुमनोहरकान्तियुते

श्रितरजनी रजनीरजनी रजनीरजनी करवक्त्रवृते ।

सुनयनविभ्रमर भ्रमरभ्रमर भ्रमरभ्रमराधिपते

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

१२. सहितमहाहव मल्लमतल्लिक मल्लितरल्लक मल्लरते

विरचितवल्लिक पल्लिकमल्लिक झिल्लिकभिल्लिक वर्गवृते ।

शितकृतफुल्ल समुल्लसितारुण तल्लजपल्लव सल्ललिते

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

१३. अविरलगण्ड गलन्मदमेदुर मत्तमतङ्ग जराजपते

त्रिभुवनभूषण भूतकलानिधि रूपपयोनिधि राजसुते ।

अयि सुदतीजन लालसमानस मोहन मन्मथराजसुते

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

१४. कमलदलामल कोमलकान्ति कलाकलितामल भाललते

सकलविलास कलानिलयक्रम केलिचलत्कल हंसकुले ।

अलिकुलसङ्कुल कुवलयमण्डल मौलिमिलद्बकुलालिकुले

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

१५. करमुरलीरव वीजितकूजित लज्जितकोकिल मञ्जुमते

मिलितपुलिन्द मनोहरगुञ्जित रञ्जितशैल निकुञ्जगते ।

निजगणभूत महाशबरीगण सद्गुणसम्भृत केलितले

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

१६. कटितटपीत दुकूलविचित्र मयूखतिरस्कृत चन्द्ररुचे

प्रणतसुरासुर मौलि मणिस्फुरदंशुलसन्नख चन्द्ररुचे ।

जितकनकाचल मौलिमदोर्जित निर्भरकुञ्जर कुम्भकुचे

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

१७. विजितसहस्रकरैक सहस्रकरैक सहस्रकरैकनुते

कृतसुरतारक सङ्गरतारक सङ्गरतारक सूनुसुते ।

सुरथसमाधि समानसमाधि समाधिसमाधि सुजातरते

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

१८. पदकमलं करुणानिलये वरिवस्यति योऽनुदिनं सुशिवे

अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत् ।

तव पदमेव परम्पदमित्यनुशीलयतो मम किं न शिवे

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

२०. कनकलसत्कलसिन्धुजलैरनुषिञ्चति ते गुणरङ्गभुवम्

भजति स किं न शचीकुचकुम्भतटीपरिरम्भसुखानुभवम् ।

तव चरणं शरणं करवाणि नतामरवाणि निवासि शिवम्

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

२१. तव विमलेन्दुकुलं वदनेन्दुमलं सकलं ननु कूलयते

किमु पुरुहूतपुरीन्दु मुखी सुमुखीभिरसौ विमुखीक्रियते ।

मम तु मतं शिवनामधने भवती कृपया किमुत क्रियते

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

२२. अयि मयि दीन दयालुतया कृपयैव त्वया भवितव्यमुमे

अयि जगतो जननी कृपयासि यथासि तथानुमितासिरते ।

यदुचितमत्र भवत्युररीकुरुतादुरुतापमपाकुरुते

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

इति श्री महिशासुरमर्दिनी स्तोत्रम्

## ॥ श्री अन्नपूर्णाष्टकम् ॥

१. नित्यानन्दकरी वराभयकरी सौन्दर्य रत्नाकरी

निर्धूताखिल घोरपावनकरी प्रत्यक्षमाहेश्वरी ।

प्रालेयाचल वंशपावनकरी काशीपुराधीश्वरी

भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

२. नानारत्नविचित्रभूषणकरी हेमाम्बराडम्बरी

मुक्ताहार विलम्बमानविलसद् वक्षोज कुम्भान्तरी ।

काश्मीरागरुवासिता रुचिकरी काशीपुराधीश्वरी

भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

३. योगानन्दकरी रिपुक्षयकरी धर्मैक निष्ठाकरी

चन्द्रार्कानलभासमानलहरी त्रैलोक्य रक्षाकरी ।

सर्वैश्वर्यकरी तपःफलकरी काशीपुराधीश्वरी

भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

४. कैलासाचलकन्दरालयकरी गौरी उमा शाङ्करी

कौमारी निगमार्थगोचरकरी ओङ्कार बीजाक्षरी ।

मोक्षद्वारकवाटपाटनकरी काशीपुराधीश्वरी

भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

५. दृश्यादृश्य विभूतिवाहनकरी ब्रह्माण्ड भाण्डोदरी

लीलानाटकसूत्रखेलनकरी विज्ञानदीपाङ्कुरी ।

श्रीविश्वेशमनःप्रसादनकरी काशीपुराधीश्वरी

भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

६. आदिक्षान्तसमस्तवर्णनकरी शंभोस्त्रिभावाकरी

काश्मीरा त्रिपुरेश्वरी त्रिणयनी विश्वेश्वरी शर्वरी ।

स्वर्गद्वारकवाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

७ उर्वी सर्वजनेश्वरी जयकरी माता कृपासागरी
वेणीनीलसमानकुन्तलधरी नित्यान्नदानेश्वरी ।
साक्षान्मोक्षकरी सदा शुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

८. देवी सर्वविचित्ररत्नरचिता दाक्षायणी सुन्दरी
वामा स्वादु पयोधरा प्रियकरी सौभाग्य माहेश्वरी ।
भक्ताभीष्टकरी सदा शुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

९. चन्द्रार्कानलकोटिकोटिसदृशी चन्द्रांशुबिम्बाधरी
चन्द्रार्काग्निसमानकुण्डलधरी चन्द्रार्कवर्णेश्वरी ।
मालापुस्तकपाशसाङ्कुशधरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

१०. क्षत्रत्राणकरी महाभयहरी माता कृपासागरी
सर्वानन्दकरी सदाशिवकरी विश्वेश्वरी श्रीधरी ।
दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

११. अन्नपूर्णे सदा पूर्णे शङ्कर प्राणवल्लभे ।
ज्ञान वैराग्य सिद्ध्यर्थं भिक्षां देहि च पार्वति ॥

१२. माता च पार्वती देवी पिता देवो महेश्वरः ।
बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥

इति श्रीमच्छङ्कराचार्यविरचितं अन्नापूर्णाष्टकं सम्पूर्णम्

## ॥ श्री दक्षिणामूर्ति स्तोत्रम् ॥

॥ ध्यानं ॥

ओं नमः प्रणवार्थाय शुद्धज्ञानैक मूर्तये । निर्मलाय प्रशान्ताय दक्षिणामूर्तये नमः ॥
गुरवे सर्वलोकानां भिषजे भवरोगिणाम् । निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥

मौनव्याख्याप्रकटितपरब्रह्मतत्वं युवानं
वर्षिष्ठान्ते वसदृषिगणैरावृतं ब्रह्मनिष्ठैः ।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दमूर्तिं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥

१ विश्वं दर्पण दृश्यमाननगरी तुल्यं निजान्तर्गतम्
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षात् कुरुते प्रबोधसमये स्वात्मानमेवाद्वयम्
तस्मै श्री गुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥

२ बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्–निर्विकल्पं पुनः

मायाकल्पितदेशकालकलना वैचित्र्यचित्रीकृतम् ।

मायावीव विजृंभयत्यपि महायोगीव यः स्वेच्छया

तस्मै श्री गुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥

३ यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते

साक्षात्तत्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।

यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ

तस्मै श्री गुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥

४ नानाछिद्रघटोदरस्थितमहादीपप्रभाभास्वरं

ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते ।

जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्

तस्मै श्री गुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥

५ देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिञ्च शून्यं विदुः

स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः ।

मायाशक्तिविलासकल्पित महाव्यामोह संहारिणे

तस्मै श्री गुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥

६ राहुग्रस्तदिवाकरेन्दु सदृशो मायासमाच्छादनात्

सन्मात्रःकरणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् ।

प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते

तस्मै श्री गुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥

७ बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि

व्यावृत्तास्वनुवर्तमानमहमित्यन्तः स्फुरन्तं सदा ।

स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया

तस्मै श्री गुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥

८ विश्वं पश्यति कार्यकारणतया स्वस्वामि सम्बन्धतः

शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेधतः ।

स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः

तस्मै श्री गुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥

९ भूरम्भास्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमान्

इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।

नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभोः

तस्मै श्री गुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥

१० सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिन्स्तवे

तेनास्य श्रवणात्तदर्थमननाद् ध्यानाच्च सङ्कीर्तनात् ।

सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः

सिद्ध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥

वटविटपिसमीपे भूमिभागे निषण्णं सकलमुनिजनानां ज्ञानदातारमारात् ।

त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं जननमरणदुःखच्छेददक्षं नमामि ॥

चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा । गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः॥

अङ्गुष्ठतर्जनीयोग मुद्राव्याजेन देहिनाम् । सिद्ध्यर्थं ब्रह्म–जीवैक्यं दर्शयन्नोऽवताच्छिवः ॥

इति श्रीमच्छङ्कराचार्यविरचितं दक्षिणामूर्तिस्तोत्रं संपूर्णम्

## ॥ तोटकाष्टकम् ॥

१ विदिताखिल शास्त्र सुधाजलधे महितोपनिषत्–कथितार्थनिधे ।

हृदये कलये विमलं चरणं भव शङ्कर देशिक मे शरणम् ॥

२ करुणा वरुणालय पालय मां भवसागर दुःख विदून हृदम् ।

रचयाखिल दर्शन तत्त्वविदं भव शङ्कर देशिक मे शरणम् ॥

३ भवता जनता सुहिता भविता निजबोध विचारण चारुमते ।

कलयेश्वर जीव विवेक विदं भव शङ्कर देशिक मे शरणम् ॥

४ भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता ।

मम वारय मोह महाजलधिं भव शङ्कर देशिक मे शरणम् ॥

५ सुकृतेऽधिकृते बहुधा भवतो भविता समदर्शन लालसता ।

अति दीनमिमं परिपालय मां भव शङ्कर देशिक मे शरणम् ॥

६ जगतीमवितुं कलिताकृतयो विचरन्ति महामाह सश्छलतः ।

अहिमांशुरिवात्र विभासि गुरो भव शङ्कर देशिक मे शरणम् ॥

७ गुरुपुङ्गव पुङ्गवकेतन ते समतामयतां न हि कोऽपि सुधीः ।

शरणागत वत्सल तत्त्वनिधे भव शङ्कर देशिक मे शरणम् ॥

८ विदिता न मया विशदैक कला न च किञ्चन काञ्चनमस्ति गुरो ।

द्रुतमेव विधेहि कृपां सहजां भव शङ्कर देशिक मे शरणम् ॥

गुरुर्ब्रह्मा गुरुर्विष्णुर् गुरुर्देवो महेश्वरः । गुरुःसाक्षात् परंब्रह्म तस्मै श्री गुरवे नमः ॥

श्रुति स्मृति पुराणानामालयं करुणालयम् । नमामि भगवद् पादं शङ्करं लोक शङ्करम् ॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम् । सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥

इति श्री तोटकाष्टकम्